परिभाषेन्दुशेखरः

१४५

४६ पत्राणि

ॐश्रीगणेशायनमः नत्वासाम्बंशिवंब्रह्मनागेशःकुरुतेसुधीः बालानांसुखबोधायपरिभाषेन्दु
शेखरम् १ प्राचीनवैयाकरणतन्त्रेवाचनिकान्यत्रपाणिनीयतन्त्रेज्ञापकन्यायसिद्धानिभाष्यवा।
र्तिकयोरुपनिबद्धानियानिपरिभाषारूपाणितानिव्याख्यायन्ते ननुलण्अइउण्सूत्रयोर्णकार
प॰ स्यैवोपादानेनाणिणग्रहणेषुसन्देहादनिर्णयोतस्माह व्याख्यानतोविशेषप्रतिपत्तिर्नहिसन्देहा
१ दलक्षणम् विशेषसामान्यतराद्यर्थरूपस्यव्याख्यानतःशिष्टकृतात्प्रतिपत्तिर्निश्चयोहियतः संदेहाच्छा ना
स्त्रमलक्षणम् अननुष्ठापकंलक्षणंतथानशास्त्रस्यनिर्णयजनकत्वौचित्यादित्यर्थः असंदिग्धानुष्ठा
नसिध्यर्थंशास्त्रेसंदिग्धोच्चारणरूपाचार्यव्यवहारेणसन्देहनिवृत्तयेव्याख्यानातिरिक्तनिमित्तानपेक्ष
अत्रसूत्रेपरेणणकारग्रहणं = न्नंबोध्यतेइतियावत् तेनाणुदित्सवर्णस्येत्येतत्परिहायपूर्वेणाणग्रहणंपरेणाणुग्रहणमितिलण् अतोऽग्रहणेस्येनारे
सूत्रेभाष्येस्पष्टम् १ तत्रसंज्ञापरिभाषाविषयेपक्षद्वयमित्याह यथोद्देशंसंज्ञापरिभाषंकार्यकाले
संज्ञापरिभाषमिति उद्देशमनतिक्रम्ययथोद्देशम् उद्देशउपदेशदेशोऽधिकरणसाधनस्थानंयत्रदेशे
उपदिश्यतेतद्देशएववाक्यार्थबोधेनगृहीतशक्त्यागृहीतपरिभाषार्थेनचसर्वत्रशास्त्रेव्यवहारः देश।
श्चोच्चारणकालएवात्रशास्त्रेव्यवह्रियते तत्तदावाक्यार्थबोधेज्ञातेभविष्यतिकिञ्चिदनेनप्रयोजनमितिज्ञान १

माात्रेण॰ संन्नष्ठयथाऋतग्राहिमतिपत्रपेहोयेपहरतीहृन्नत्रेकैयटः केचित्तुपरिभाषाविषयेनस्मित्रि
न्यादिवाक्यार्थेबोधेसप्तमीनिर्देशादिर्केतिपर्यालोचनायांसकलतत्तद्विध्युपस्थितौसकलतत्संस्कारापे
क्षाभेदंपरिकैस्यकवाक्यतयैवनियमः कार्यकापेतेतत्रिपायामप्युपस्थितिरितिविशेषः एतदेवाभि
प्रेत्याधिकारोनामत्रिःप्रकारः कश्चिदेकदेशस्थः सर्वशास्त्रमभिज्वलयतियथाप्रदीपःसुप्रज्वलितः स
र्वंवेश्माभिज्वलयतीतिषष्ठीस्थानइतिसूत्रेभाष्येउक्तम् अधिकारशब्देनपारार्थ्यात्परिभाषाप्युच्यते।
कश्चित्परिभाषारूपइतिकैयटः दीपोयथाप्रभाद्वारासर्वगृहप्रकाशकः एवमेतत्सूत्रद्विज्ञनद्वारासर्व
भाष्य- शास्त्रोपकारकमिति तेनात्वयेपत्तद्वयसाधारणंभाष्यम् एतदेयेविधिप्रदेशेकवाक्यतयाद्वतःप्र विधिप्रदेशा- भाष्यारः
तीतेः तत्रैतावान्विशेषःयथोद्देशपक्षेपरिभाषादेशेसर्वविधिसूत्रबुद्धावात्मभेदंपरिकल्प्यतैरेकवाक्यता विधिसूत्राणि- विशेषः
परिभाषाणाम् तदुक्तं क्ङितिचेतिसूत्रेकैयटे यथोद्देशेप्रधानान्यात्मसंस्कारायसन्निधीयमानानिगुणा
कार्यकालपक्षे विधिप्रदेशेषु परिभाषाबुद्धो- भेदंप्रयुज्जतइति कार्यकालेतुतत्तद्विधिप्रदेशेपरिभाषाबुद्धौ्येकवाक्यतेति अत्रैकदेशस्थाइत्यनेन तत्र

© Dharmartha Trust J&K. Digitized by eGangotri

न्त्विति लिटः कानज्क्वस्वोर्वा ग्रहणं च कृतं तज्ज्ञापयति वासरूपसूत्रेऽपवाद आदेशान्तानां कानः प्रत्ययएव।
रटश्चेति कैयटादौ ध्वनितं तत्फलं तु सदादिभ्यो भूतसामान्ये लिटः क्वसुरेव न तु पदेतेति ङितिबोध्यम् ९८
ननु ङमो ह्रस्वादित्यादौ ङमः परस्याचो विधेयत्वेन ङमर्इति वा सन्देहः स्यादत आह ॥ उभयनिर्देशे पञ्च-
मीनिर्देशो बलीयान् ॥ अचीति सप्तमीनिर्देशस्य समयङ्ङन्नन्त्युत्तरत्र चारितार्थ्यात्पञ्चमीनिर्देशो नवका-
द्याइति तस्मादित्युत्तरस्येत्यस्यैव प्रवृत्तिः यत्र तु ङःसिधुडित्यादावुभयोरपि चारितार्थ्यं तत्र तस्मिन्निति सूत्राये
त्वयात्तस्मादित्युत्तरस्येत्यस्य परत्वात्तेनैव व्यवस्थाएव मुभयोश्चारितार्थ्यपि यथा मि सर्वनाम्नः इत्यादौ तत्रामी
ति सप्तमी त्रे सुपइत्यत्र कृतार्थ्यात् आदिति पंचमी आज्जसेरसुगित्यत्र चरितार्थेति स्पष्टं तस्मिन्निति सूत्रे भाष्यकै-
यटे च ९९ नन्वतः कृकमीति सत्वमयस्कुम्भीत्यत्र न स्यात् कुम्भशब्दस्यैवोपादानादत आह ॥ प्रातिपदि-
कग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् समानाधिकरणेन विशेषणरूपेण वा प्रातिपदिकबोधकशब्दग्रहणे सति लिं-
गबोधकप्रत्ययविशिष्टस्यापि तेन ग्रहणं बोध्यपि नाकेवलस्यापीत्यर्थः अस्याश्च ज्ञापकं समानाधिकर-
णाधिकारेऽस्य कुमारः श्रमणादिभिरिति सूत्रे स्त्रीलिङ्गः श्रमणादिपाठः स्त्रीप्रत्ययविशिष्टश्रमणादिभिः
सह कुमारीशब्दस्यैव सामानाधिकरण्ये न कुमारशब्दस्येति तज्ज्ञापकम् इयं च द्विपदस्योत्तिमाद्युपपदविधौ।

महदादिष्वसिद्धस्वरविधौ राजन्यैरेब्राह्मणकुमारयोर्बहोर्नञ्वदुत्तरपदभूम्नीत्यादौ समाससंज्ञातग्रहणेषु
वचनप्रवर्तते इति इडप्राप्त्ये भाष्ये स्पष्टम् विभक्तिनिमित्तककार्यं चनेत्यपि तत्रैव तत्र समासान्तविधावप्येव
प ग्रहणेष्वेव न समाससंज्ञातग्रहणेन प्रवर्तत एव स्वरविधावेव समाससंज्ञातग्रहणे तत्र दोषोक्तेः बहुव्री
३१ हेरूपसंख्यातिसूत्रस्य भाष्याच्च एतावतैवानित्यत्वादप्रवृत्तिः दोषाः खल्वपि साकल्येन परिगणिताः इति भा
ष्योक्तेः नन्वेवं बहुव्रीहेरूपसंख्येति सूत्रस्य भाष्यासंगतिः तत्र हि केऽरोथ नीत्यत्र न स्नुतस्त्रीति कवापादि
तो न यं तं बहुव्रीहेरित्यस्याप्राप्तेत न यंत स्वबहुव्रीहित्वाभावात्तदसंगतिः न ये त्वनोपः समास इत्यर्थे न च प वि
हृतः न यत्न प्रकृतिकस्य वर्णोपरपदकः समास इतीति चेत्र अनयापरिभाषया स्त्रीप्रत्ययसमभिव्याहा
रे तदहिते दृष्टानां प्रत्ययसमभिव्याहारे तदहिते दृष्टानां प्रातिपदिकत्वतदाप्यपर्भाणां विशिष्टविषयीम
न्नमतिदिश्यतइत्याशयात् ० नन्वेवं पुनः पश्येत्यत्रे च पुंवतीः पत्रेयत्यत्रापि स्युवेति संप्रसारणं स्यादत
आह ॥ विभक्तौ लिंगविशिष्टाग्रहणम् ॥ इयत्वेषुवो रत्नाकावित्यत्र भाष्ये चट्टचदीयग्रहणे न लिङ्गविशि
ष्टपरिभाषया अनित्यत्वात् तल्लभ्ये लेखेत्यन्ये ० ननु तस्यापत्यमिति एकवचनं नपुंसकाभ्यां निर्देशाज्ज्ञार्ग्यौगा ३१
र्ग्यौ गार्ग्याः इत्याद्यसिद्धमतआह ॥ सूत्रेलिङ्गवचनमतन्त्रम् ॥ अर्थं नपुंसकमिति नपुंसकग्रहणमस्याः ज्ञापकम्

नित्यनपुंसकत्वार्थं तु न तदित्यन्यत्र निरूपितं यात्वकलालम्ब्यायेन नान्तरीयकतयातयोरुपादानमिति तस्या
पत्यमित्यत्र भाष्ये स्पष्टम् अत एवाकङार सूत्रे एकेति च विनार्थमित्यन्यत्र विस्तरः २२ ननु भ्रशादिभ्यो भू
व्यच्चेरिति विधीयमानः क्यङ् कादिवाभ्रशामवंतीत्यत्रापि स्यादत आह ॥ नञिवद्युक्तमन्यसदृशाधिकर
णे तथा ह्यर्थगतिः ॥ नञ्युक्तमिवयुक्तं वान्यत्किंचित्तत्सदृशे तेन न तत्स्याद्वित्रेनान्यसदृशेऽधिकरणाद्ये कार्यं वि
ज्ञायते हि यतस्तथार्थगतिरस्ति न ह्यब्राह्मणमानयेत्युक्ते लोष्टमानीय कृती भवति अतस्मिंस्तभिन्ने च तन्त
सदृशेऽभूततद्भावविषये क्यङ् नोक्तदोषः अयं चार्थेष्वविभक्तावप्रथमायामित्यादौ विभक्तिग्रहणाद्येतन्त्वा
यस्मिन्नर्थानुवाद एव एतेन विभक्तावित्यायस्यानित्यत्वे ज्ञापकमिति वदन्तः परास्ताः अनित्यत्वे भाष्यसम्म
तफलाभावात् अत एवाकर्तरि चेति सूत्रे कारकग्रहणं भाष्ये प्रत्याख्यातमिति बोध्यम् स्पष्टा चेयं भ्रशादि
ष्वरिति सूत्रे भाष्ये अत्रान्यसदृशोपत्रागाकारादृश्यस्य भेदाघटितत्वं सूचयति निरूपितं चैतन्मञ्जूषायाम् २३ ननु
व्याघ्रीकच्छपीत्यादौ सुबन्तेन समासान्ततोपपत्तौ ङ्नाहंष्यदन्तत्वाभावाज्जातिलक्षणो ङीष् न स्यादत आ
ह ॥ गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः ॥ उपपदमतिङिति सूत्रेऽतिङ्ग्रहणेन ङगाती
त्यत्र तत्सपकर्षणेनातिङन्तेन समासस्यार्थात्तयोः सूत्रयोः संप्राप्तस्यानिर्दिष्टेकदेशानुमत्याकारकोपे

प॰ ३२

चसिद्धेयन्तो नाम्नःक्रीतीतिसिद्धा अन्यथा पूर्वंदाप्यदन्तत्वाभावाक्क्रीडाकरणोऽनीतिप्रसङ्गात् अस्यानित्य
त्वात्किञ्चित्सुब्रूपत्यनन्तरमपिसमासः यथा साहितस्य धनक्रीतेति ग्रन्थेनतनित्यत्वेनमानं तत्राजादि
त्वाद्धाविनयाङः अतएवकम्भकारस्य नषष्ठीसमासोपिसुबुत्पत्तेः पूर्वमेवषष्ठीसमासाभावेचोपपदस
मासः कृतएकार्थीभावइति न तत्रवाक्यमित्युपपदमिति सूत्रे भाष्ये स्पष्टम् तत्रहिषष्ठीसमासादुपपदसमा
सो विप्रतिषेधेनेतिवार्त्तिकम् अथवा विभाषाषष्ठीसमासः यदा न षष्ठीसमासस्तदोपपदसमास इति न
न्यत्याख्यानं च यद्यपि उपपदसमासस्यान्तरङ्गत्वाभिप्रायकं न षष्ठीसमासाभावादुपपदसमास इति
वार्त्तिकस्योक्तम् तथापि तदुभयप्रत्याख्यानपरमथवेत्यादिभाष्यम् परिभाषायां समासायतः कारको
पादानेनकारकविभक्तयन्तेन ह्रादिः समासः समासस्य सुबुत्पत्तेः पूर्वमेवलाभात् एतेनैवाकारकतद्विशेषो
पादानमेवेतिपरास्तम् अस्याविधेयैकवाक्यताभावेनविप्रतिषेधादिशास्त्रवत्कार्यं प्रत्यव्यापकत्वेनोपा
दानमेवेमर्थालाभाच्च १४ ननु गिदचामित्यत्र धातोर्म्रुङ्गीकार्यं तर्हि चरेत्तेवेवेति नियमेनाधातोरेव नु
मिसिद्धेः धातुग्रहणानर्थक्यमत आह ॥ साम्प्रतिकाभावे भूतपूर्वगतिः ॥ तत्तद्वचनसामर्थ्यान्न्यायसि ३२
द्धोयम् तत्सामर्थ्यादधातुभूतसर्वस्यापीमर्थं न गोमत्यतेः क्विपिगोमानित्यादौ नुमसिद्धिः नासीत्या

दि सूत्रे भाष्ये स्पष्टा ७५ वहुव्रीहौ तद्गुणसंविज्ञानमपि ॥ अपिना ऽतद्गुणसंविज्ञानम् तेषां गुणाना
मवयवपदार्थानां संविज्ञानं विशेष्यान्वयित्वमिति तदर्थः यत्र समवायसंयोगान्यतरसम्बन्धेन सम्ब
न्धः अन्यपदार्थस्तत्र प्रायस्तद्गुणसंविज्ञानं अन्यत्र प्रायो ऽन्यत् लम्बकर्णचित्रगुरुदाहरणे सर्वादीनि जल्पितस्या
दयइति चोदाहरणे सर्वनामसञ्ज्ञा सूत्रे भाष्ये एव स्पष्टा ७६ ननु वदः सुपि क्यप् चेति चेनानुकृष्टस्य पतो ऽभ
वे ऽभावस्तत्राप्यनुवृत्तिः स्यादत आह ॥ चानुकृष्टं नोत्तरत्र ॥ णमुल्स्वनवर्तमाने ऽप्यपेपद्याभिप्रेते ति
सूत्रे पुनर्णमुल्ग्रहणमस्या ज्ञापकम् अन्यथा त्क्त्वा चेत्येव वदेत् तद्धि उभयोरुत्तरत्र सम्बन्धार्थम् उदाहरणा
नि स्फुटानि इदमनित्यम् अत एव तृतीयाच होरित्यत्र चानुकृष्टाया अपि द्वितीयाया अन्तरान्तरेणेत्यत्र सम्बन्धः
लदिवत्कृपइति सूत्रस्य नानुकृष्यर्थसकलचकार प्रत्याख्यानेन विरुद्धेयम् व्याख्यानादेवानुवृत्तिनिवृत्त्यो
र्निर्वाह इति तदाशयात् कृलिजा ह्रुकौ चेति सूत्रस्य भाष्यविरुद्धाच तद्धि द्विगोष्ठंश्चेति सूत्रात्ष्ठन् तत्र चेना
नुकृष्टस्य वोमतरस्यामित्यस्य चानुवृत्तिं स्वीकृत्य लकुकौ चेति भाष्ये प्रत्याख्यातम् ७७ नन्वनुदात्तादेरन्तो
देरन्तोदात्तात्त्वं यदुच्यते तद्व्यञ्जनादेर्व्यञ्जनान्तात्त्व न प्राप्नोतीत्यत आह ॥ स्वरविधौ व्यञ्जनमविद्यमानव
त् ॥ स्वरोद्देश्यके विधावित्यर्थः नोत्तरपदे ऽनुदात्तादावपृथिवीरुद्रपूषमन्थिष्विति सूत्रे ऽपृथिव्यादि पर्युदासो ऽस्या

ज्ञापकः अस्यस्थाऽस्थ्यादीनामनुदात्तादित्वाभावादप्राप्तेन दैर्घ्यं स्पष्टमेव धर्मिग्राहकयानादेवचस्व
रोदेश्यकविधिविषयमिदम् अतएव शान्तरन्तमो नघजादीअचः कर्त्तव्यकीत्यादाकृजादीअचश्मादीनो
प० चारितार्थ्यम् अतएव राजवतीत्यादौ नलोपस्यासिद्धत्वादन्वितोशाहृत्वादन्तोवस्याइतिसवर्णेनोदक्षिता
३३ नित्यत्रक्रुत्स्वन्तुड्भ्यामितिमतुबुदावर्त्तवचनेत्याकरः स्पष्टं चेदंसमासेस्येतिसूत्रेभाष्ये उञ्छेरुदात्तइति
33 सूत्रैकै यदस्त्वश्यमनावश्यकीसमभिव्याहृतात्ज्ञापकयोगेणाहलोपिउदात्तादिवदत्रभासात्तदुपपत्तेस्याह
तत्रभाष्ये पिधनिसमेतत् ७८ नन्वेवमपिराजदृषदित्यादौ समासस्यान्तोदात्तत्वेषकाराकारस्यनस्या
दतआह ॥ हलन्वरप्राप्तौव्यञ्जनमविद्यमानवत् ॥ अस्माश्रयतोनावश्तिसूत्रेनोप्रतिषेधोज्ञापकः
नाषभिन्यत्राद्दिनेकारेणनस्वरयोग्यतायस्याकारस्तयोरेपानासावादिविशिष्टेप्रतिषेधोनर्थकः नचादिवे
वनकारउदात्तगुणविशिष्टोन्तरतमान्त्वयोरिस्विनिवाच्यम् तथासतिनिमित्तभूतस्यानुकत्वस्यविनाशादुप
जीव्यविरोधिनायुदात्तप्राप्तेरित्यत्रविस्तरः स्पष्टं चेदं समासस्येतिसूत्रेभाष्ये ७९ ननुस्वरगुणेति।
निषेधस्तस्यातिस्यात् दिवश्रादित्योत्वंदिवःक्विप्यपिस्यात्तथायतोनावश्तिस्वरोणेपत्यपिस्यातत्रश्ह
शाडिःग्रणाइतिचइत्यपिसूत्रादतआह ॥ निरनुबन्धकग्रहणेनसानुबन्धकस्य ८० तदनुबन्धकग्रहणे। ३३

नाऽतदनुबन्धकग्रहणम् ॥ वामदेवाड्ड्यड्ड्याविति सूत्रे अड्यतोऽड्त्वमनयोर्ज्ञापकम् तद्धि यथा तेना
श्रातदर्थं इत्यत्रानयोरग्रहणार्थं नञः परस्य यदन्त स्यान्तरपदस्यान्तोदात्तमिति तदर्थः एवं चावामदे
व्यो ऽव्ययपूर्वपदप्रकृतिस्वर एव भवति तस्मात्त्रानुबन्धकग्रहणे सचान्यत्रानुबन्धो यस्य तद्ग्रहणे नेत्यर्थः
एते च प्रत्ययाप्रत्ययग्रहणसाधारणादि वैश्चोऽक्षिपादौ भाष्ये संचारितत्वात् वर्णग्रहणे चानयोरप्रवृत्तिरि
ति बोध्य ऽत्राप इत्यत्र भाष्ये येनानुबन्धेन सानुबन्धकत्वं तदननुबन्धकत्वादिवा तदनुच्चारणमेवेषा युक्तिग्राह
कमानात् तेन जश्शसोरित्यत्र नैषेति निरनुबन्धकत्वात् तद्धितशस एवाग्रहणं स्यादिति न शंक्यम् एवम
न्यायस्तत्रानुबन्धोच्चारणमेव तेन वनोरचेत्यादौ वनिप्क्वनिपोर्ग्रहणसिद्धिः एकानुबन्धकग्रहणे सम्भ
वतीति त्वर्थ्यानभाष्यादिसम्मतः इत्यन्यत्र विस्तरः ७९ ननु ऊढोरइत्यादौ स्वार्थकत्वात्स्वार्थिकानां प्रकृ
तितो लिङ्गवचनानुवृत्तेर्न्यायसमासतादिस्त्वानुपपत्तिरथुकल्पमित्यत्र नपुंसकत्वैकवचनयोरनुपपत्तिश्च
त्यतआह ॥ क्वचित्स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते ॥ णचः स्त्रियामिति सूत्रे स्त्रियामिति
क्रिस्यात्वापिका अन्यथा कर्मव्यतिहारे णच् स्त्रियामिति णचः स्त्रियामेव विधानात् किं तेन स्पष्टा चेयं बहु
ज्विधायके भाष्ये ८२ ननु सूपयीतगारीति प्रवोरणाकाविति सूत्रभाष्याद्दाहृतेरनः स्त्रियामिति कस्मादत।

आह ॥ समासान्तविधिरनित्यः ॥ एतेनैश्वादयस्तत्पुरुषे अन्तोदात्तता यांश्वादिषु राजन्शब्दपाठो
ऽस्यानित्यत्वज्ञापकः अन्यथा टचैवान्तोदात्तत्वे सिद्धे किं तेन द्वित्रिभ्यां पाद्दन्मूर्द्धस्विति स्वरविधायके भाष्ये स्पष्टेयम्
८३ ननु शतानीत्यादौ नुमि कृते षट्सञ्ज्ञा प्राप्नोति ततश्च लुक् स्यात् तथा उपदास्त्वत्र त्वे कृते तस्योपधा
रिष्वेतीत्वं प्राप्नोति अतआह ॥ सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ सन्निपातो द्वयोः सम्बन्ध
प. ३४ 34 स्तन्निमित्तो विधिस्तं सन्निपातं यो विहन्ति तस्यानिमित्तमित्यर्थः उपजीव्यविरोधस्यायुक्तत्वमिति न्यायमू
लेयं अतएवात्र सन्निपातशब्देन न पूर्वपरयोः सम्बन्ध एव किन्तु विशेष्यविशेषणसन्निपातोपि गृह्यते अत
एव ग्रामणिकुलमित्यादौ नपुंसकह्रस्वत्वे पिति कृति तुगिति तुङ् न प्रातिपदिकाजन्तत्वसन्निपातेन जा
तस्य ह्रस्वस्य तद्विघातकत्वात् तुकाजन्तत्वविघातः स्पष्ट एव न चास्या अपवादत्वेन तस्य बहिरङ्गतया
सिद्धत्वम् अर्थेकृतत्व बहिरङ्गत्वाश्रयणस्योक्तत्वात् किञ्चैवं तत्तुकोऽसिद्ध इत्येतद्धलात्तूतिग्रहणं च
रितार्थो बहिरङ्गपरिभाषायाः प्रवृत्तेः सर्वविधसन्निपातग्रहणादेव वर्णाश्रयः प्रत्ययो वर्णविघातस्यानि
मित्तं स्यादिति एतत्परिभाषादोषनिरूपणावसरे वार्तिककृतोक्तम् नहि प्रत्ययः पूर्वपरसन्निपातनिमित्त ३५
कः स एव सन्निपातशब्देन गृह्यत इति मत्वा न प्रत्ययः सन्निपातनिमित्तक इतिशंकायां तदभ्युपेत्यैवाहु:

सञ्ज्ञातद्दिग्ध्रनिमित्तं स्यादित्येकदेशिनोक्तमिति न तद्भाष्यविरोधः किन्त्वेवं शैवोगार्ग्यावैनतेयश्वा
दावप्यङ्गसञ्ज्ञायालोपनिमित्तत्वानापत्त्यावण्णिश्रयत्वस्यैवैयर्थ्यम् ग्रामणिकुलं ग्रामणिपुत्र इत्या।
दावुत्तरपदनिमित्तके कृत्स्नेयथाकथंचिद्बहिरङ्गपरिभाषयापिवारणं सम्भवतीति कृत्स्नेजन्तः कृत्स्न
स्यापितीति सूत्रे चैकदेशिनानयापरिभाषयातद्वारितोभाष्ये अतएवपरिभाषाफलत्वेनेदमुक्तं कृत्स्ने
जन्तसूत्रेवार्तिककृतेति केचित् सन्निपातलक्षणविधित्वमस्या लिङ्गम् स्वप्रवृत्तेः प्राक्तनिमित्तभूतो
यः सन्निपातस्तद्विघातकस्यसातिरिक्तशास्त्रस्य स्वयमनिमित्तमिति फलति नन्वेवं रामायेत्यादौ सुपिच
तिदीर्घोनापत्तिः अन्तरङ्गत्वेन सन्निपातेनजातस्ययादेशस्यतद्विघातकत्वात् नचयञादित्वमापेक्षदी।
र्घस्य बहिरङ्गतया असिद्धत्वात्तत्र सन्निपातविघात इति वाच्यम् आरोपितासिद्धत्वेपिवस्तुतस्तद्विघातस्य जा
यमानत्वेनैतत्प्रवृत्तेः किंचान्तरङ्गकर्तव्यबहिरङ्गस्यासिद्धत्वेपितत्कृतेनस्यासिद्धत्वमानाभावः किंचा
तिदेशिकसन्निपातविघाताभावमादायैतदप्रवृत्त्यागोरीत्यादौ स्नुद्धिलोपेपिस्थानिवत्त्वेन कृत्स्ननिमित्त
सन्निपातविघाताभावात्तत्रैनस्यादिति यत्यामपिपरकृत्स्नेजन्त इति सूत्रस्थभाष्यासङ्गतिः सन्निपातस्याशास्त्री
यत्वाश्रयस्थानिवत्त्वमिति तत्रासिद्धत्वमपि कथमिति विभाव्य अपरत्वाद्वीयेः सिद्धत्वाप्रवृत्तेरीदूदेदिति सूत्रे

कैयटेन स्पष्टमुक्तत्वात् एवं च पूर्वत्रासिद्धीयेपि कार्ये एतत्परिभाषाप्रवृत्तिर्भवति चेन्न कष्टायेति निर्देशे
न तस्या अनित्यत्वात् ययोः सन्निपातस्य विघातकं शास्त्रं तयोः सन्निपातनिमित्तकविध्युपादानमपेक्षि
प॰ तमिति न नायं दोषः न यवदादिति बित्वमः कारान्तप्रकृती सन्निपातनिमित्ताङ्ग॰संज्ञानया परिभाषया लो
२५ पस्य निमित्तं न स्यादित्याशंक्या अनित्यत्वेन समाहितं क्रमेजनन्तस्य सूत्रे भाष्ये न स्वङ्ग॰ संज्ञायामदन्तस्यांगसंज्ञे
35 त्युक्तमस्ति न च कुम्भकारेभ्य आधेयेत्यादावयसंज्ञाया अनया परिभाषया वारणं परभाष्यासङ्ग॰ति स्व
या परिभाषया लुङ्॰ माभूत् अव्ययत्वं तस्मादेव लुकादिति दीयसन्निपातस्य विघातेनाव्ययसंज्ञायास्सञ्ज्ञा।
फलं त्वक वृस्यादिति वाच्यम् एतदुदाहरणं परभाष्यप्रामाण्येन साक्षात्परंपरया वा स्वनिमित्तसन्निपातवि।
घातकस्यास्य मनिमितिन दर्शनाद्दोषात् एतेनात्राकस्यादित्यपास्तं न च कार्यकालपक्षे लगेकवाक्यताप
न्नसंज्ञावाधे प्यकजे कवाक्यतापन्नास्यादिति वाच्यम् अन्तरंगाणीतदेकवाक्यतापन्नसंज्ञायां वहिरङ्ग॰ गुणा
देरसिद्धत्वात् लगेकवाक्यतापन्नात् न गुणादितो वहिरङ्गन उभयोरपि शब्दतः स्वाश्रयत्वात् नयोस्सयो
रितिज्ञापकाश्चैषाः तित्वा तेन नातिप्रसंगः स्पष्टा चेयं क्रमेजनन्त इति सूत्रे भाष्ये अस्या अनित्यत्वे फलानि। ३५
भाष्ये परिगणितानि वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तम् दाक्षिः १ आत्वं पुक्विधेः क्रापयति २

पुगन्तस्य अदीदपत् ३ त्यदाद्यकारस्याद्विधेः यासेति ४ इड्विधिपिवकारलोपस्य पपिवान् ५ ह्रस्वनुड्भ्यां
मतुप्स्वन्तोदात्तादुत्तरपदादिति मतुविभक्त्युदात्तत्वं पूर्वनिघातस्य अग्निमान् परमवाचा ६ नदीह्रस्वत्वस्य
सम्बुद्धिलोपस्य नादिकुमारीत्यादि ७ यादेशः सुपिचेति दीर्घत्वस्य ८ इत्येतावन्मात्रप्रवृत्तिरेव दोषाः खल्वपि साक
ल्येन परिगणितानीति भाष्याभिकेतत्वमत्र विस्तरः ८४ ननु पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्रः इत्यादौ द्विगोर्लुगिति त्व
णो लुकि लुक्तद्धितलुकीति ङीप्रत्ययलुक्यानुकः अवणागपतिरत्राह ॥ सन्नियोगशिष्टानामन्यतरापाये उ
भयोरप्यपायः ॥ अत्र च बिल्वकादिभ्यश्छस्य लुगिति सूत्रस्थं छग्रहणं ज्ञापकम् तद्धि छमात्रस्य लुग्बाधन
द्वारा कुकोऽनिवृत्तिर्यथा स्यादित्यर्थम् कृतकुगागमानन्तरं छन्तर्गणे बिल्वादयः पठ्यन्ते निर्दिष्टा बिल्वकादिशब्दे
न न चैवमपि छग्रहणं व्यर्थं कृतकुगागमानुवादसामर्थ्यादेव तदनिवृत्तिसिद्धेरन्यथा बिल्वादिभ्य इत्येव वदेत्
लक्षणप्रतिपदोक्तपरिभाषया बिल्वादिषु दकारेण विहितप्रत्ययस्यैव लुग्विधानान्नातिप्रसंग इति वाच्यम् ततो
विप्रतिपदोक्तत्वेन बिल्वादिभ्यो णितिविकारार्थस्य लुगापत्तिवारणार्थं कुगनुवादचारितार्थ्यात् समस्त्वपार्थ
कत्वशङ्कायोगान्निपेपयोरेककालिकत्वेकदेशाननियमाज्ज्ञापकसिद्धापीयम् यत्तु णाविष्टवदित्यनेन पुंव
द्विधानमेतदनित्यत्वज्ञापनार्थम् अन्यथा एतयनी स्याद् इत्यादि लोपेनेव ङीपि निवृत्तेः सन्नियोग विशिष्टप

विभाषयानस्यापिनिवृत्तेरेनयनीत्यादिसिद्धौ पुंवत्त्ववैयर्थ्यं स्यादत एव तितेरिति सूत्रे कैयटस्तत्र इडविडमाचष्टे ऐडवि
डयतीत्यादौ पुंवत्त्वस्यावश्यकत्वात् येनेयः श्रुयेने परत्वादिनस्यानिवर्तनेन सिद्धमित्यन्यत्र विस्तरः ८५ ननु कु
प॰ कुराशीलमस्याः माचोरीत्यादौ शीलं छत्रादिभ्यो णोऽङीषन्नप्राप्नोत्यत आह ॥ ताच्छीलिके णेऽण्कृतानि भवं।
३६ ति अवित्यणि विहितप्रकृतिभाववाधनार्थं कार्मस्ताच्छील्य इति निपातनमस्यान्तापकम् ताच्छीलिके णा
36 तादेणाद्यवरति फिन्नसिद्धिरण्यस्याः प्रयोजनमिति नव्याः ताच्छीलिकस्त्वेकेऽन्दस्यां प्रदर्शनमिति तो।
दाणेत्येव कार्मेइति सूत्रे भाष्ये स्पष्टा ८६ ननु कंसपरिमृड्भ्यामित्यादौ मृजेर्वृद्धिर्दीर्घ्वी रेत्यत आह ॥ धातोः
कार्यमुच्यमानं तत्प्रत्यये भवति ॥ श्रौणाहत्येति तत्त्वनिपातनं चास्यान्तापकम् धातोः स्वरूपग्रहणे तत्प्रत्य
ये कार्यविज्ञानमिति पाठस्त्वसदृशमितित्यादावव्रदानस्य चङ्गुपधस्येत्यमापादनेन भाष्ये दूषितः यत्कार्यंप्र
त्ययनिमित्तकं तत्रैपंच्यवस्थापिका तेन पदान्तत्वनिवन्धनेन शेवैतिक्रत्वप्रणारभ्यामित्यादौ भवत्येव रय
ङादिविधौ तेनैषानम्रस्तुथियोरिति निषेधेनानित्यत्वात् मृजेर्वृद्धिरित्यत्र भाष्ये स्पष्टैषा ८७ ननु सर्वकेऊव।
केरित्यादौ सर्वनामाव्ययसंज्ञेनस्यातामत आह ॥ तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥ नेदमदसोरकोरिति ३६
प्रतिषेधोऽस्यान्तापकः तदेकदेशभूतं तद्ग्रहणेन गृह्यत इति येन विधिरिति सूत्रे भाष्ये पाठः ८८ ननु गातिस्था

घुपाभ्यभ्यइतिसिचोलुग्यासीदित्यादौप्राप्तेश्वपिस्यादतआह ॥ लुग्विकरणालुग्विकरणयोरलुग्वि
करणस्य ॥ अस्याश्चज्ञापकंस्वरतीतिसूत्रेसूङ इतिवक्तव्येसूतिसूयत्योः एयद्धि दे शइतिकैयटः तत्रसाह
चर्यादलुग्विकरणस्यैवग्रहणेप्राप्तेएयद्धि दे शइत्येतज्ज्ञापकंचिंत्यम् ध्वनितांचेयंपरिभाषायस्यविभाषे
त्यत्रभाष्ये नन्वत्रद्विविदितइतिप्रयोगेनिषेधमाशंक्ययदुपाधेर्विभाषातदुपाधेर्निषेधः विभाषाणामहन्विद
विशामितिसूत्रेशविकरणस्यग्रहणंलुग्विकरणस्यायमित्युक्तम् तत्रबोद्धेतौ यतोयंलुग्विकरणोतोवि
शिसाहचर्याच्छविकरणस्यैवग्रहणंनतुहन्तिसाहचर्यादस्यापिपतत्परिभाषाविरोधादितितदाशयः
अतएवपरिभाषायालुग्विकरणस्यैवेतिनोक्तम् केवलंतुभाष्येएषाक्वापिनपठितागातिस्थतिसूत्रेपि
वतेर्ग्रहणंकर्तव्यमितिवार्तिककृतासर्वत्रैवपाग्रहणेलुग्विकरणस्यग्रहणमितिभाष्यकृताचोक्तम् स्वरती
तिसूत्रेकैयटेनचस्पष्टमुक्तम् ८९ नन्वग्निर्वायपिबतीत्यादौहेरचङीतिविधीयमानेकुत्वंनस्यादतआह ॥ प्रकृ
तिग्रहणेण्यधिकस्यापिग्रहणम् ॥ अचङीतिप्रतिषेधएवास्याज्ञापकः इयंचकुत्वविषयैवहेरचङीतिसूत्रे
भाष्येस्पष्टेयम् ९० ननुच्छत्रपमित्यादौभ्वसोरत्रभ्वमितिच्छेदे भ्वसोभ्वमितिकृतेनेत्वलोपएवत्वंस्यादतआह ॥
अङ्गवृत्तेपुनर्वृत्तावविधिः ॥ अङ्गेऽङ्गाधिकारेवृत्तेनिष्पन्नेयत्कार्यंतस्मिन्सतिपुनरङ्गसंज्ञाकार्यस्यप्रवृत्तौप्रहत्ताव

विधानंभवतीत्यर्थः यथाचज्यादादीयसइत्याद्विधानेनज्ञापिता अस्येयकारलोपेनाकृत्सार्वेतिदीर्घाणां च।
सिद्धौ न हेयपर्थ्यस्पष्टमेव अतएवभिन्नस्थानिकांगकार्यविषयाप्येषा इयंचानित्याद्वयोरितिनिर्देशात् अनित्य
प॰ त्वबललमप्यार्थमादायैवभ्यसोभ्यमितिसूत्रेभाष्येपरनिष्ठितस्येतिपठितम् केचित्तुनयापरिभाषयानकिंचि
१२ ल्लत्वंसाध्यते अतएवन्हा नेर्जाज्यादादीयसइतिसूत्रयोरेनांज्ञापयित्वाकिंप्रयोजनमितिप्रश्नेऽपिवतेर्गुण
प्रतिषेधउक्तः सनवक्तव्यइत्येवप्रयोगसक्तं ननुलत्वसिद्धिरूपे तदुक्तंभ्यसोऽभ्यमित्यत्राभ्यमित्येवच्छेदः शेषे।
लोपश्चान्त्यलोपएवअतोगुणइतिपररूपेणासिद्धंयुष्मभ्यमित्यत्रनिरूपितं एवंचसूत्रद्वयस्येतज्ज्ञापनपरं
भाष्यंभ्यसोभ्यमितिसूत्रस्थंचभाष्यमेकदेश्युक्तिरित्याहुः ५१ यत्तेश्चारोदितिवाच्येश्चारोणइतिगुणग्रहणा
न्संज्ञापूर्वकविधेरनित्यत्वंइयंचविधेयकोटौसंज्ञापूर्वकत्वएव तेनस्वायंभुवमितिसिद्धम् तथानिलोडित्ये
वसिद्धेऽग्रानिग्रहणादागमशास्त्रमनित्यम् तेनततर्दकामस्येतिसिद्धम् तथातनादिपाठादेवसिद्धेतना।
दिकृञ्भ्यइतिसूत्रेकृञ्ग्रहणाज्ज्ञाणकार्यमनित्यन्तेनविभ्रसेदविभ्रसलमितिसिद्धंचत्तिङोङिःकरणादनु
दात्तेत्त्वलक्षणमात्मनेपदमनित्यम् तेनस्फायतिर्विमीकेत्यादिसिद्धम् तथाविनार्थनञासमासेनुदात्तेप १४
दमनेकमित्येवसिद्धेवर्जग्रहणाद्व्रज्वदिनमनित्यम् तेननेपडुवडिःत्यस्यानित्यत्वाद्देहत्रइतिसिद्धमि।

तितत्र भाष्येऽदर्शनात् भाष्यानुक्तत्वापि तादर्थ्यस्य साधुतानियामकत्वे मानाभावात् भाष्याविचारितप्रयो
जनानां सौत्राहरणोपारायणादावष्टमात्रार्थकत्वकल्पनाया अनौचित्यात् किंचत्वापितेपिआनीत्यस्य
नसार्थकस्य माङागमस्य प्रयोगाप्रसिद्धेः आग्रहणात् लोङ्ग्रहणवदिति बोध्यम् अत एव घोर्लोपो लेटि वे
तिसूत्रे वेतिसूत्रे वेति प्रत्याख्यानम् लोपे पिआडिपदे तेआटः श्रवणम्भविष्यति दधादिति अदिदधदिति आ
गमशास्त्रस्यानित्यत्वेनाटिश्रमति दधादिमस्यासिद्धावाग्रहणस्यावश्यकत्वेन तत्प्रत्याख्यानासंगतिः स्पष्टे
व एतेन यत्कैयटे केचिदित्यादिना अस्यैव वाग्रहणस्य तदनित्यत्वज्ञापकता सापि चिंत्या प्रत्याख्यानपरभा
ष्यविरोधात् चक्षिङो ङकारस्यानेकत्वाभावसंपादनेन चारितार्थ्याच्च तनादिसूत्रे कृञ्ग्रहणस्य भाष्ये
प्रत्याख्यानाच्च एवमेवातिदेशिकमनित्यं सर्वे विधयो लोपविधिरिड्विधिश्च बलवानित्यादिभाष्यानुक्तेर्बो
ध्यम् स्तापं भुवमित्यादिलोके साध्वेव तत्र न्यत्र विस्तरः यदपि ननु हन्तेर्यङ्लुकि आशीर्लिङि वधादेशो न
स्यात् तस्माह ॥ प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणमिति ॥ याश्हित्वस्याह्निः प्रयोगत्वसिद्धान्तेन प्रयो
गहयङ्रूपे समुदाये प्रकृतिरूपत्वबोधनेनेदं न्याय प्रसिद्धम् अत एव जङ्घनीत्यादौ हित्वकृते षत्वसिद्धिरिति
तदपि न भाष्येऽदर्शनात् किंच तेन सिद्धांतेन प्रत्येकं द्वयोस्तत्त्वबोधनेपि समुदायस्य तत्त्वबोधने मानाभावः अतए

वदयतेर्दिर्गीति सूत्रे ऽस्मिंस्तः परत्वाद्द्वित्वे कृते परस्यासिद्धत्वेऽभ्यासे भावे पूर्वस्य श्रवणं प्राप्नोतीत्याशंक्य विषयसप्तम्या
श्रयणेन परिहृतं भाष्ये अन्यथा त्वकृते रीरैक्यां ज्ञिद्वर्वचनन्यायेन समुदायस्यैवादेशापत्तौ तदसंगतिः स्पष्टै
व तस्मादुत्तरखण्डमादायैव यथायोगं तत्कार्यप्रवृत्तिर्बोध्या भूसुवोस्तिङीत्यस्य तदन्तानुरूपस्यार्थान्ताप्रसङ्गः
प निषेधस्यैवाभ्युपगमे नियम इति न तद्विरोधः तस्मात्स्याद्वितेर्यङ्लुकि च ध्यादित्यादिभाषावाधुदाहृतं चिंत्यमेवेत्य
३८ न्यत्र विस्तरः ४९ यदपि न त्वह ह्वियर्स्याचामादिति तत्रैकपरिभाषोपस्थितौ शालीयायसिद्धिरत आह ॥ वि
386 धेयोपरिभाषोपतिष्ठते नानुवादे ॥ अनूद्यमानविशेषणेषु तन्नियामकपरिभाषा नोपतिष्ठत इति तदर्थः वि
धेयाङ्गभूतानां परिभाषाणां विधेयेनासिद्धतया सम्बन्धासम्भवे पि तद्विशेषणे व्यवस्थापकत्वेन चरितार्थानां
तद्विशेषणे व्यवस्थापकत्वमानाभाव इति तर्कमूलेयम् किं चोदीचामातःस्थाने इति सूत्रे स्थाने ग्रहणा
मस्यालिङ्गं अन्यथा षष्ठीस्थाने इति परिभाषयैव तल्लाभेऽतैर्हेयर्थ्यं स्पष्टमेवेति तत्र उदात्तस्वरितयोर्य
ण इत्यादौ च्यङः संप्रसारणमिति सूत्रभाष्यीकरीत्या ह्लोपो न इत्यादौ च तस्याव्यभिचरितत्वात भाष्यानु
क्तत्वाच्च स्थानसम्बन्धो न परिभाषालभ्य इत्यर्थस्य षष्ठीस्थाने इति सूत्रे स्पष्टमुक्तत्वेन तदुक्तज्ञापकासम्भवा ३८
त्तत्र स्थानग्रहणं तत्स्पष्टार्थमेव किंच विधेयोपरिभाषोपतिष्ठत इति प्रवादः केवलं हल्ग्रचश्चेत्यत्र यनयोर्वि

धीयत इत्यथ्याहारमूलकोऽन्यत्र तु नाप्स्याः फलमित्यन्यत्र विस्तरः ९२ ननु नमस्करोति देवान्नमस्यति
देवानित्यादौ नमः स्वस्तीति चतुर्थी दुर्वारेत्यत आह ॥ उपपदविभक्तेः कारकविभक्तिर्बलीयसी ॥ कारक
विभक्तित्वं च क्रियाजनकार्थकविभक्तित्वम् तच्च प्रथमायामप्यस्तीति सापि कारकविभक्तिरिति सूत्रयु।
क्तेरित्यादिसूत्रेषु भाष्यध्वनितं इयं च वाचनिक्येव अत एव यस्य च भावेनेति सप्तम्यपेक्षयाधिकरणसप्तम्या
बलवत्वमनेन न्यायेन तत्र च दीयत इति सूत्रे भाष्यध्वनितं कैयटेन तु स्पष्टमुक्तम् एतेन क्रियान्वयित्वं कार।
कत्वमित्यपास्तम् यस्य च भावेनेति सप्तम्या अपि क्रियान्वयित्वात् येतु प्रधानीभूत क्रियानिमित्तकार्यत्वेन का
रकविभक्तीनां बलवत्त्वं वदंति तेषामुभयोरपि क्रियासम्बन्धनिमित्तकत्वेन न तदसङ्गतिः स्पष्टैव नमोवरिव
इति सूत्रेण नमस्यति देवानित्यादौ चतुर्थी वारणाय भाष्ये उपन्यासस्यासङ्गतेश्च एतेन क्रियाकारकसम्बन्धो
न्तरङ्गः इति तन्निमित्ता विभक्तिरन्तरङ्गा उपपदार्थेन तु यत्किंचित्क्रियाकारकभावमूलकः सम्बन्ध इति तन्नि
मित्ता विभक्तिर्बहिरङ्गेत्यपास्तम् नमस्यतीत्यत्र नमः पदार्थस्यापि क्रियाकारकभावेनैवान्वयात् अत्र च नमः
पदार्थस्यापि क्रियात्वं मूढ उ यतो मूढ उस्यैव सहयुक्त इत्यादौ च प्रधाने प्रथमासाधनार्थमियं भाष्ये उपन्यस्ते
त्यन्यत्र विस्तरः ९३ नन्वेवमप्यङि·यादौ पूर्वस्यापि मुत्वापत्तिरत आह ॥ अनन्त्यविकारेऽन्त्यसदेशस्य अन्त्य

सदेशानन्त्यसदेशयोरेकप्रयोगे युगपत्प्राप्त्यभावे ऽनन्त्यसदेशस्यैवेत्यर्थः अन्यथा थाथादेर्नत्वसत्वे नेनासोति
त्यादावेव स्यात् तान नत्वनमति सिंचतीत्यादौ अनंत्यविकारइति चलितुं॰म अन्येन समानो देशोऽयस्येत्यानन्त्यसदे
प॰ ३५ शः नतवं चात्र वर्णितद्वारिणीयोक्तिराद्यवत्यानेन बोध्यम् अतएव विद्व इत्याद्यर्थं न संप्रसारणइति च विता
र्थम् अल्लोपोनइत्यादेरनलनेणत्वादावाद्याकारादावप्रवृत्तिरप्यस्याः फलम् यज्ञादिपरात्रं नांडु॰स्याका
39 रस्य लोपरस्मर्थस्यैवाङ्गं शेषमत्वयस्यो स्थितः काकां दत्तये पोचितत्वात् अङ्गावयवस्य यज्ञादिपरस्यानइत्यादिक्र
मेणानेकक्लिष्टकल्पनापेक्षया ऽस्याउचितत्वात् नचैवाष्ट्रउः॰ संप्रसारणमिति सूत्रे भाष्यप्रत्याख्या
नेतिभ्रमितव्यम् वार्तिकोक्तफलानामनेकक्लिष्टकल्पनाभिरन्यथासिद्धिप्रदर्शनापि यान्येतस्याः परि
भाषायाः प्रयोजनानि तदर्थमेषा कर्तव्या प्रतिविधेयं दोषेषु प्रतिविधानं चोदात्तनिर्देशात्सिद्धमित्युपसंहा
रात् मिमार्जिषतीत्यर्थं च सानत्र ह्रदेः पूर्वमन्तरङ्ग॰त्वाद्धित्वे परत्वादभ्यासकार्ये ततो ऽभ्यासेकारस्य द्व
हिर्वारणाय सावश्यकी नच हृदेरेषु नरभ्यासरूपत्वेन सिद्धिः लक्ष्येलक्षणस्येति न्यायेन पुनरप्रवृत्तेः पत्त
नसंप्रसारणइति सूत्रे भाष्ये नैतस्याः परिभाषायाः प्रयोजनानीत्युक्तम् तस्यायमर्थः पतत्सूत्रप्रयोजना ३५
नानि भवन्तीति व्यघादावनन्त्यसमानदेशयणोभावात् नैतान्येतस्याः प्रयोजनानीति यात्रोकचिदृश्यते वाच

निक्वैवैषा स्पष्टा च ष्यङः इति सूत्रे ऽदसो मेरिति सूत्रे च केचिदन्त्यसदेशस्येत्यनेन भाष्यस्थत्यत्र विस्तरः ९४
नन्वनुकरणस्यानर्थ इति परद्यूयं पतृ इति पटितीत्यादावलोन्त्यस्येत्यन्त्यस्य प्राप्नोतीत्यत आह ॥ नान
र्थकेलोन्त्यविधिरनभ्यासविकारे ॥ अनभ्यासस्तु क्ते विभक्तीत्यादौ अज्जामिदित्याद्यन्त्यस्यैव प्रभ्या
सोनर्थकोर्थावृत्त्यभावात् किन्तु तदावदङ्प्वार्थवानित्यत्र निरूपितम् एषालोन्त्यसूत्रे भाष्ये स्पष्टा ॥
फलानामन्यथाद्धिकरणेन प्रयत्नात् ताचेतितन एवावर्ष्यम् ९५ ननु ब्राह्मणवत्साच ब्राह्मणीवत्सश्चे
त्यादौ पुमान्स्त्रियेत्येकशेषापत्तिः स्त्रीत्वपुंस्त्वातिरिक्तकृतविशेषाभावादत आह ॥ प्रधानाप्रधानयोः
प्रधाने कार्यसम्प्रत्ययः ॥ तेन प्रधानस्त्रीत्वपुंस्त्वातिरिक्ताप्रधानस्त्रीपुंस्त्वकृतविशेषस्यापि सत्वेन न दोषः
स्पष्टा चेयं पुमान् स्त्रिया नपुंसकमनपुंसकेनेत्यादौ भाष्ये अन्तरङ्गोपजीव्यादपि प्रधानं प्रबलमिति हेत
मति चेत्यत्र भाष्यकैयटयोः ९६ ननु स्वस्त्रादिनप्रवृत्तो मातृशब्दस्य ङीन्निषेधः परिच्छेदवाचकमातृशब्दस्य
ऽपि स्यादत आह ॥ अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी ॥ तेन स्वस्रादिस्थस्य जननीवाचकस्यैव ग्रह
णं न तु परिच्छेदवाचकस्य योगजबोधे तदनालिङ्गितरूढ्यर्थबोधोपस्थितिः प्रतिबन्धिकेति मुत्पत्तिरेतद्बीजम्
रथकारादिकरणन्यायसिद्धो यमर्थः कश्चिद्दीधीवेवीटामित्यत्रानयापरिभाषयादीधीङ्वेवीङोरेव ग्रह

णं

एंनत्तदीङ्· धीङ्· वेञ्वीनामितितत्र तथा सति दीवेधीवीटामित्येववदेदित्यन्ये ९७ ननु वातातयनार्थया
वाक्तेः वङेः वैकल्पिकत्वाज्ञातत इत्याशयपि स्यादत आह ॥ व्यवस्थितविभाषयापि कार्याणि क्रियन्ते ॥ तस्या
नुसाराद्व्यवस्था बोध्या शाच्छोरिति सूत्रे लटः शत्रित्यादिसूत्रे च भाष्ये स्पष्टा ९८ विधिनियमसम्भवे वि
धिरेव ज्यायान् ॥ नियमे हि प्रकृताया अन्यनिवृत्ते सामर्थ्यात्परिकल्पनमनुक्तानुवाददोषश्चेति लाघवा
द्विधिरेवेति बोध्यम् यस्य हल इत्यत्र इजादेः सनुम इत्यादौ च भाष्ये स्पष्टा ९९ नन्वाशंसायां भूतवच्चेत्यने
न लुङ्· इव लङ्· लिटोरप्यतिदेशः स्यादत आह सामान्यातिदेशे विशेषानतिदेशः ॥ सामान्योपस्थिति
काले नियमेन विशेषस्यानुपस्थापकसामग्र्यभावो ऽस्या बीजं तेनानद्यतनभूतत्वरूपविशेषे विहितयोर्लङ्लिटो।
र्नातिदेशः इयमनित्या नल्यपीति लिंगात् तेन स्थानिवत्सूत्रेण विशेषातिदेशो पि स्पष्टं चैतत्सर्वं स्थानि
वत्सूत्रे भाष्ये १०० ननु तिन्स्वरितमिति स्वरितत्वं किरतीत्यादावपि स्यादत आह ॥ प्रत्ययाप्रत्यययोः प्र।
त्ययस्य ग्रहणम् ॥ इयं चाङ्गस्येति सूत्रे भाष्ये पठिता वर्णग्रहणे च न प्रवर्तत इति तत्रैव कैयटे स्पष्टम् अत
एव सनाशंसभिक्ष उः चलेरित्यत्र सन्चलयोः प्रत्यययोर्ग्रहणं परे तु तिन्स्वरितमिति सूत्रे एषा परिभाषा ल।
क्षणसंस्काराय भाष्ये क्वापि नाश्रितेति कैयटेनोक्तम् अङ्गस्येति सूत्रे तत्प्रत्याख्यानाय एवा भाष्ये एकदेशिनोक्ता।

प· ४० ५० ४·

अत एव तितिप्रत्ययग्रहणं कर्त्तव्यमिति वार्त्तिककृतोक्तम् उक्तसूत्रयोर्व्याख्यानात्प्रत्यययोरेव ग्रहणमि
त्याहुः ॥१॥ ननु विपराभ्यां जेरित्यात्मनेपदे परास्सेनां जयतीत्यर्थिके पराजयति सेनेत्यत्र प्राप्नोतीत्यत आ
ह ॥ सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् ॥ तेन विशब्दसाहचर्यादुपसर्गस्यैव पराशब्दस्य
ग्रहणमिति तत्रैव भाष्ये स्पष्टम् सहचरणं सदृशयोरेवेति सहचरितशब्देन सादृश्यवानुच्यते रामलक्ष्म
णाविव्यादावपि सादृश्यमेव नियामकम् सदृशयोरेव सहविवक्षानयोरेव सहप्रयोगा उत्सर्गाच्च ध
नितं चेदं कर्मप्रवचनीययुक्ते द्वितीयेति सूत्रे भाष्ये तत्र हि पंचम्यपाङ्परिभिरित्यनेन लक्षणादिषु न कर्मप्र
रियोः पंचमीमाशंक्य यद्यप्यपपरि द्दृष्टापचारौ वर्जने चापपरित्वलभ्यमपशब्दो द्दृष्टापचारो वर्जनार्थ एव कर्म।
प्रवचनीयस्तस्य कोन्यः सहायो भवितुमर्हतीत्यन्यो वर्जनार्थात् यथा स्वर्गोः सहायेनार्थश्रुतिगोरेवानी
यते नाश्वो न रासभस्स्मृतम् तेन हि सदृशानामेव प्रयोगस्सहायभावो बोधितः द्विस्त्रिश्चतुरिति सूत्रे सा
हचर्येणैव कृत्वोर्थानां ग्रहणं सिद्धे कृत्वोर्थग्रहणादेशः नित्यानेन दीधीवेवीटामित्यत्र यथान्तसाहचर्य।
स्यागमस्यैतो ग्रहणमित्यन्यत्र विस्तरः ॥१॥ नन्वस्त्रीस्याघनङ्प्रियसक्या ब्राह्मणेनेत्यत्र स्यात् अतङ्कुःस
नपुंसकत्वाभावादत आह ॥ कृतान्नमितयोः कृतसम्बन्धो बलवान् ॥ कृतेनैव सम्बन्धो नान्नमितेन।

प्रकरणादिप्राप्तेनेत्यर्थः प्रकरणादितः श्रुतेर्बलवत्त्वादितिभावः एवं च नञ्लिङ्गमस्यादीनामेव विशे
षणं नाङ्गस्य शिशीलरानुमविधिषु तदन्तसमासस्याभावात्प्रकरणप्राप्ताङ्गस्यैव नपुंसकत्वे यथा स्या
त् वहुधा ददतो येषु तानि कुलानि बहुददन्ति इत्यत्र मा भूत् बहूनि ददन्ति येषु तद्बहुददन्ति इत्यत्र यथा स्यादि
प॰ त्येवमर्थस्य स्पष्टं चेदं स्वमोर्नपुंसकादित्यत्र भाष्ये केचित्तु अचो रहाभ्यां द्वे इत्यत्र श्रुतेन रेफस्य निमित्तत्वेन परे
४९ तद्भावात्तन्निमित्तं कार्यं तत्त्वं बाध्यत इत्येतदुदाहरणमाहुस्तत्र तत्त्वं कौण्डिन्यन्यायेन सिद्धेरित्यन्यत्र विस्तरः ९३
41 ननु तत्स्वरूपेण तस्यार्थे इति स्वरः परमेणाकारकेण परमकारकेणेत्यादौ स्यात् तथा गतिस्याद्युपाभ्यस्य इति
लक्षणैकपद्येणपरणा इत्यतः कृतान्तस्यापि स्यादत आह ॥ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ॥
लक्षणं लाक्षणिकमुपचारात् तत्तद्विभक्तिविशेषाद्यनुवादेन विहितो हि समासादिः प्रतिपदोक्तस्तस्यैव
श्री ग्रहणं शीघ्रोपस्थितिकत्वात् द्वितीयो हि विलम्बोपस्थितिकः येन्यस्य पाश इति रूपं लक्षणानुसन्धानपूर्वकं विल
म्बोपस्थितिकं पिबतेस्तु तच्छीघ्रोपस्थितिकं इदमेव हि परिभाषाबीजम् इयं च वर्णग्रहणेपि प्रवर्तते मा
भूत्संचारितत्वात् यत्र वर्णग्रहणे नैषा अदेङ्ग इत्यत्रोपदेशग्रहणादिति तत्तु तत्सिद्धत्रैव सूत्रे शब्देन्दुशेखरे दूषि
तमिति तत एव द्रष्टव्यम् अनिनस्मञ्चेयम् भवन्महाव्याहृतेरिति महाव्याहृतिग्रहणादित्यन्यत्र विस्तरः ९४ ४९

नन्वेवं देङो दोधातोश्च कृतात्वस्य घुसंज्ञा न स्यात् तथा मेङः आत्वे प्रणिमातेत्यादौ नेर्गदेति णत्वमपि न स्यात् तथा
गैरत्वम्य स्वात्वे ग्रामा स्येतीत्वं न स्यादत आह ॥ णमादाय ग्रहणेष्वविशेषः ॥ अत्र च ज्ञापकं देङः पित्त्वं तद्धि घ्वप्रविवि
सामान्यग्रहणार्थं अन्यथा लाक्षणिकत्वादेव विधौ तदग्रहणे सिद्धे किं निषेधे सामान्यग्रहणार्थं न पित्त्वेन ते
नैकदेशानुमितिद्वारा संदर्शनापरिभाषा ज्ञाप्यते इयं च लक्षणप्रतिपदोक्तपरिभाषानिरनुबन्धकपरिभा
षा तु विकरणपरिभाषाणां वा पिका तथा च स्थिति इत्येभाष्ये स्वच्छ्वा ग्रातिष्यति सूत्रे ग्रहणादेशग्रग्रहणमेवेष्य
तइति निर्देशात् स्यष्टत्रविस्तरः १५ ननु कृत्यादिसंज्ञाः समुदाये स्युरत आह ॥ प्रत्येकं वाक्यपरिसमाप्तिः ॥
देवदत्तादयो भोज्यन्तामित्यत्र भुजिवत् १६ नन्वेवं संयोगसंज्ञा समाससंज्ञा ऽभ्यस्तसंज्ञा अपि प्रत्येकं स्युर
तआह क्वचित्समुदायेपि ॥ गर्गाः शतं दण्ड्यन्तामर्थिनश्च राजानो हिरण्येन भवन्तीत्यादौ दण्डनवत्तस
मुदायेन च व्यवस्था १७ ननु सूत्रस्यात्मा विन्यत्रे क्षिपत्ते दीर्घनिर्देशादनणत्वेनग्राहकत्वं ज्ञाप्यतो दात्ताद्यम
नमोच्चारणे त्वसरूपसंज्ञा न स्यादत आह ॥ अभेदकाः गुणाः ॥ असतिपतेत्स्वरूपेणोच्चारितो गुणो न भेद
कोनविवक्षितः अर्थः अत्र चास्थिदध्यात्याद्यनङ्देद्दात्तस्येवोच्चारणे न सिद्धे उदात्तग्रहणं ज्ञापकम् स्वर
यणोच्चारितस्त्वक्के न दानादेरेनोदात्तादिस्वदानादिशब्दोच्चारणो विवक्षितैव उच्चरणश्यत्वानुनासिकपवोच्चा

रणीयेवोध्यापथिमथ्यृभुक्षामादित्यादौ स्थान्यनुरूपतयानुनासिकोच्चारणीयेन निरनुनासिकोच्चारणा
दिविवक्षा एतदर्थमेवास्तिपरत्रस्त्वकम् नचैवमस्म्यादीनां नविषयस्त्वेत्याद्युदात्ततयान्नादेशस्यानङः स्थान्य
प० ४२ नुरूपेणनुदात्तएवोच्चारणीये उदात्तोच्चारणां विवक्षार्थं भविष्यतीति कथमस्य ज्ञापकत्वमिति वाच्यम् एवमा
स्यशब्दादावन्तोदात्ते उदात्तगुणाकस्यापि स्थानिनेत विवक्षायां मानाभावात् चतसर्याद्युदात्तनिपातनेक
42 रिष्यतेवयादेशे आद्युदात्तनिपातनं करिष्यते पदादयोः नोदात्तानि पात्यन्ते महस्पसउदात्तो निपात्यतत स्वादि
भाष्यंतएकश्रुत्याः ष्टाध्यायीपाठे क्वचिदुदात्ताद्युच्चारणं विवक्षार्थमित्याशयेन त्रैस्वर्येणाधीयत इति पहेत
ज्ञापकपरं भाष्यमिति कैयटादयः एवन्तनिपातनेनामाम्नाहशेअप्रयोगेप्राप्तेन्याहृश अप्रयोगाकरणेन तद्रूपा
यन्नातनवतनोदात्तादिविवक्षा तिसृचतसृइत्यत्रापि हृन्द्वम् एकेन्तोदात्ते उच्चारणीये आद्युदात्तोच्चारणाम् ।
अन्यत्रस्थानेनुरूपेस्वरेउच्चारणीये तत्तदुच्चारणं विवक्षार्थं सम्प्रणिष्टाध्यायी आचार्येणैकश्रुत्यापठितेत्यत्र
नमानेक्वचित्यदस्यैकश्रुत्यापि पाठो यथादाण्डिनायनादिसूत्रेपेत्वाकेति यद्यप्यध्येतार एकश्रुत्यैवाहुनति।
पठन्ति ब्राह्मणावत्तथापि व्याख्यानतोऽनुनासिकत्वादिवदुदात्तनिपातनादि ज्ञानमित्याशः विधेयाणिविषये ४२
तुअप्रत्यय इति तिनिषेधात्र ग्रहणाभेदकत्वेन सवर्णाग्रहणाम् अतएवचटवदित्यादौ मतोर्मस्यनानुनासिको

वकारः अन्तपवत ह्वानामामिति सूत्रनिर्देशः अमयाप्रत्यये भाषायामिति नित्यमनुनासिकः स्यात् जा
तिपदेन नास्योपयोग इति बोध्यम् दृश्यादौ दीर्घमात्र इति जातिनिर्देशात्तद्वतीति त्यमन्त्रविस्तरः १८ न
नु सर्वनामानीत्यादौ णत्वाभाव निपातनेऽपि लोके सणत्वप्रयोगस्य साधुत्वं स्यादत आह ॥ वाधकान्येव नि
पातनानि ततः कार्ये णत्वाप्राप्ते निपातनारम्भात् पुराणप्रोक्तेष्विति निपातितं पुराणशब्दे नपुरातनशब्दस्य
बाधः प्राप्तोऽपि तुट् बाधितः दत्त्वात्रेति बोध्यम् पुराणेति टुडभादताद्विः पुरातनेति चेन्न भये सर्वादि सूत्रे भाष्ये
स्पष्टा अबाधकान्यपि निपातनानीति तत्र भाष्यविरुद्धम् १९ ननु उवेथानोर्द्वित्वे सति तयवरूपत्वात्पूर्वमभ्यास
रूपस्याप्रवृत्तौ हलादिः शेषे सवर्णदीर्घे रूपसाधनमिति तत्राह ॥ पर्जन्यवल्लक्षणप्रवृत्तिः ॥ एवं च रूपस्याप्यह
ल्लक्षणेन लक्षणस्येति न्यायेन न पुनरावृत्तिः नडकमिकोकल इति भाष्ये कृतकारित्वमपि शास्त्रे पर्जन्यव
दिति सिद्धेऽपि रूपसादिकारी समर्थः न च लक्षणस्य सकृदेव प्रवृत्तिरिति न्यायेन मानमिति वाच्यम् समेऽवा
लोपमेक इति लोपे नैकसकारस्य द्वित्वेन द्विसकारस्य पुनर्द्वित्वेन त्रिसकारस्य च सिद्धो समः स्थटीति सूत्रस्ये
वमानत्वात् संप्रसारणाच्च क्षिचिदृद्धित्यादौ भाष्ये स्पष्टमकृतत्वाच्च अत्र विकारागमकृतो लक्ष्यभेदो नेति
सिद्धेदृद्धिरिति भाष्यात्प्रतीयत इत्यन्यत्र विस्तरः २० ननु स्पन्दधातोः स्यन्त्स्यतीत्यादावात्मनेपदनित्यत्वाभाव

निमित्तत्वान्नद्वन्द्वस्यत्रभ्यइतिनिषेधस्यबहिरङ्गत्वेनान्तरङ्गत्वाद्धदिलत्वाणस्येदविकल्पस्याप्रवृत्तिरतआह ॥ निषे
धास्त्रबलीयांसः अन्तरङ्गान्नडुपजीव्यादपिबलीयांसःशस्त्रयः चत्रभ्यइतिवस्पष्टार्थमेव अतएवतत्प्रत्याख्यानं
भाष्योक्तंसङ्गच्छते अतएवसर्वाणसंज्ञादेर्निषेधविषयेनविकल्पः अन्यथामीमांसकरीत्याविधेरुपजीव्य
प. ४३ त्वेनप्राबल्यात्तस्यसर्वथाबाधानुपपत्त्यासङ्ग्वीरइतिमञ्जूषायांविस्तरः अतएवद्वन्द्वेचविभाषाजसीतिच
रितार्थम् विभक्त्यल्लनायप्रवृत्तिरस्याविजनलमताकर्मणिडित्यनयोर्भाष्येस्पष्टैव ॥११॥ नन्वत्यन्तस्वा
र्थिकानामर्थप्रत्यायकत्वरूपप्रत्ययत्वानुपपत्तिरतआह ॥ अनिर्दिष्टार्थाःप्रत्ययाःस्वार्थे ॥ यस्यार्थःप्र
कृत्याप्रत्याय्यतेसोपिप्रत्ययस्तस्याप्यङ्गीकारात्तस्यप्रत्ययत्वमितिनदोषः स्वार्थेइत्यस्यस्वीयप्रकृत्यर्थेइ
त्यर्थः महासञ्ज्ञाबलादर्थाकाङ्क्षायामन्यानुपस्थितिरस्याविजसुपिस्यइत्यादिसूत्रेषुभाष्येस्पष्टैषा ॥१२॥
योगविभागादिष्टसिद्धिः ॥ इष्टसिद्धिरेवनत्वनिष्टापादनंकार्यमित्यर्थः तत्तत्समानविधिकद्वितीययोगे
नविभक्तस्यानित्यत्वज्ञापनमेतद्बीजम् ॥१३॥ पर्यायशब्दानांलाघवगौरवचर्चानाद्रियते ॥ तत्रतत्राप्यतरस्यां
विभाषावेतिसूत्रनिर्देशाज्ज्ञापितमिदम् ॥१४॥ ज्ञापकसिद्धंनसर्वत्र ॥ स्पष्टमेवपतितत्वेअनुमानाज्ज्ञापनस्यसा
र्वत्रिकत्वार्थमित्यर्थः तेनपरिभाषामादायानिष्टतापादनीयमितितात्पर्यंभाष्येपिध्वनितमेतदुक्तार्मसूत्रा° ४३

दौ ज्ञापकेतिन्यायस्याप्युपलक्षणम् न्यायज्ञापकसिद्धानामपिकेषांचित्कथनमन्येषामनित्यत्वबो
धनायेतिभावः यथातस्यानायन्नेतद्धर्मलाभइतिन्यायसिद्धस्यानित्यत्वंज्ञापकासिद्धंचतत्रज्ञानन्त्विया
विति ११५ ननुङोरग्याङ्घोरग्याङ्घोठाङ्घोठेत्यादौयत्वादीनामसिद्धत्वात्सर्वत्रद्वित्वेएकत्रयत्वमपरत्रठत्वमित्य
स्याप्यापत्तिरतआह पूर्वत्रासिद्धीयमद्वित्वे ॥ द्वित्वभिन्नेपूर्वत्रकर्तव्येपरमसिद्धमित्यर्थः पूर्वत्रासिद्धमि
त्यधिकारभवशास्त्रत्वमस्यालिङ्गं यत्रचसिद्धासिद्धत्वयोःफलेविशेषस्तत्रैवेयं क्रुस्नद्धित्यादौजश्त्वात्
र्वमनन्तरंवाद्वित्वेरूपेविशेषाभावेननतास्याःप्रवृत्तिःइत्यन्यत्रविस्तरः सर्वस्यद्वेइतिसूत्रेभाष्येस्पष्टैषा ११६
ननुगोषुअश्वेषुचस्वामीत्यादिवद्गोष्वश्वानांचस्वामीत्यपिस्यात् स्वामीश्वरेतिसूत्रेणषष्ठीसप्तम्योर्विधानात्
दतआह ॥ एकस्याःआकृतेश्चरितःप्रयोगोनद्वितीयस्यास्तृतीयस्याश्चभविष्यति ॥ यत्राभ्याकृतिकरणे
भिन्नार्थत्वसम्भावनातद्विषयोऽयंन्यायइत्यन्यत्रविस्तरः कृञ्चानुप्रयुज्यतइतिसूत्रेभाष्येस्पष्टेयम् ११७ ननु
विध्यायेत्यादौपरत्वाद्धलादिःशेषेवस्यसंप्रसारणंस्यादतआह ॥ सम्प्रसारणंतदाश्रयंचकार्यंबलवत् ॥
तदाश्रयंसम्प्रसारणाश्रितमितिपूर्वरूपम् वस्तुतोलिट्यभ्यासस्येतिसूत्रेउभयेषांग्रहणस्योभयेषांसंप्रसारण
मेवयथास्यादित्यर्थत्वेनेदंसिद्धमित्येषाव्यर्थेतिलिट्यभ्यासस्येतिसूत्रेभाष्येस्पष्टम् फलान्तरंत्वस्यासिद्धि

रपि तत्रैव भाष्ये स्पष्टा। णोच संख्याडेरित्यादौ संख्याडेरित्यादिर्विषयसप्तमीति तत्रापि न दोषः इत्यन्यत्र विस्तरः ॥१८॥
यत्र क्वचिद्विकृतिः प्रकृतिं गृह्णातीति तेन निसमुपविभ्यो ह्वः इत्यत्र ह्वग्रहणेन ह्वेञो ग्रहणसिद्धिः तथा ॥ औपदे
प॰शे शिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम् ॥ तेनदादेर्धातोरित्यत्रौपदेशिकधातोरेव ग्रहणमिति तत्र
४४ तयोर्निर्मूलत्वाज्ज्ञाप्याव्यवहृतत्वाच्च नच विकृतिः प्रकृतिं गृह्णातीति ग्रहिज्येति सूत्रस्य भाष्येणायापास्ति
५५ रस्कारश्च निसमुपविभ्यो ह्व इत्यादौ केञानुकरणे सौत्रः प्रयोगः आत्वविषये एवात्मनेपदं प्रयोगस्थाना
मेवानुकरणस्य युक्तत्वात्सूत्रे भाष्ये स्पष्टमुक्तत्वादित्यन्ये अन्याति तत्रत्रोपदेशग्रहणं कुर्वतः सूत्रकृतो
वार्तिककृतश्चासंमता इह हि व्याकरणे सर्वेष्वेव सानुबन्धकग्रहणेषु रूपमाश्रीयते यत्रास्यैतद्रूपमिति
रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकं प्रयोगं तस्मिंश्च लौकिके प्रयोगे सानुबन्धकानां प्रयोगो नास्तीति
कृत्वा द्वितीयः प्रयोग उपास्यते कः उपदेशो नामेति युक्तं ज्ञादि सूत्रस्य भाष्येणाप्रायोगिकासम्भवे तद्ग्रह
णमित्यर्थस्य लाभेन भाष्यासम्मता च भाष्ये सानुबन्धकेत्यादि प्रकृताभिप्रायेण दादेरिति सूत्रे दादिपदस्यौ
पदेशिकदादित्ववत्तिलक्षणेति न दोषः इत्यन्यत्र विस्तरः ॥१९॥ यदपि न नु अजर्घा वेभिदीतीत्यादौ तन्न कृणा ४४
प्रयुक्ता विकरणाय यङ्लुकि सुः तथा यङ्लुकि वेभिदितेत्यादावेकाचरतीति निषेधः स्यादत आह ॥ स्नि

पाशपानुबन्धेननिर्दिष्टंयद्गणेनच यत्रैकाज्ग्रहणंचैवपञ्चैतानिनयङ्लुकि ॥ अनुबन्धनिर्देशोहि
यास्वरूपेणाङिन्तइत्यादिपदेनच हन्तियातिवाति सनीवन्तेतिसूत्रेभरेति दीङोयुडचिअनदात्तङितः।
दिवादिभ्यः पश्यनएकाचउपदेशेऽस्वदाहरणानि द्वित्वंसनाद्यन्ताइतिभूवादयइतिधातुसंज्ञचभवत्येवशु
णोयङ्लुकोरित्यादिभिर्निषेधानित्यत्वकल्पनात् तेनभष्भावोप्यजर्घाइत्यादौभवति अतएवश्चीदितर
तिसूत्रेकैयटेयत्रैकाज्ग्रहणंकिञ्चिदितिपाठः एकाचउपदेशेनुदात्तादितिसूत्रेएकाज्ग्रहणेनैकदेशा
नुमत्याएवाज्ञाप्यते अन्यथोपदेशेनैकाचामुदात्तत्वसैवसत्वेनतद्वैयर्थ्यंस्पष्टमेवेतितदपिनभाष्यानुक्त
त्वादेकाज्ग्रहणस्यवधिव्याहत्यर्थमावश्यकत्वाच्च नचवधिः स्यान्सुपदेशेएकाजेवेतिवाच्यम् साक्षादु
पदेशसम्भवेनैनतद्विषयेस्यान्सुपदेशाग्रहणात् उपदेशात्वावच्छेदेनैकाचइत्यर्थाच्च किंचोत्तरार्धमेकाज्ग्र
हणमतएवजागरितवानित्यादावुपदेशेउगन्तत्वमादायश्र्युकइतीण्निषेधोन तत्रोपदेशइत्यनुवृत्ति
श्रुत्तीणिमित्यादावीण्निषेधायेत्याकरेस्पष्टम् नचभाष्येयङ्लोपेवेभिदितेत्यादाविटप्रहत्यर्थमुपदेशे
त्वदात्तादेकाचः श्रूयमाणादङ्गादित्यर्थेसनीड्प्रतिषेधोवक्तव्योविभित्सतीतिदोषोपन्यासवत्यङ्लुकि
दोषानुपन्यासेनतत्रेडिष्टः यङ्लोपेइत्यादिभाष्यंतुएकमोपसंहारबलेननयङ्लुग्विषयंकिंचतस्य

तद्विषयत्वे यङ्॰लोपे स्थानिवत्त्वस्यैव यङ्॰लुक्सूत्रपाठोपदर्शनेन सन्ननापत्तिरिति वाच्यम् इड्विषये यङ्॰लुको लो
के ऽनभिधानेन छन्दसि सर्वविधीनां वैकल्पिकत्वेन च तत्र दोषानुपन्यासेनादोषात् अन्यथैकाज्ग्रहणं किम
र्थमिति प्रश्नस्यानुत्तरत्वापत्तेः तात्पर्यार्थमिदं वचनमर्थमित्युत्तरस्य च भाष्ये निरालम्बनत्वापत्तेः न चार्ह्यात्कात्तिमपा
प॰शे॰ ७५ तोरेकाच इति विशेषणाम् एवं च विभित्सतीत्यादावुत्तरावयवे स्यधातोरेकाच्त्वमस्त्येवोत्तरावयवे ऽस्तित्ववत् ।
त्त्ववदयते रिति सूत्रे भाष्ये स्पष्टम् एवं च प्रकृतभाष्यासङ्गतिरिति वाच्यम् आदेशे ऽपेक्षितिमान्वयेवमानाभा
वात् अङ्गं त्वन्तविशिष्टपदविषयकाचोद्देश इति सूत्रे भाष्ये स्पष्टम् निरूपितञ्चैतन्नादिशेषेणाहेन्दुशेखरे धातन्वंत
त्तरावयवेऽपव अतएवैकाचोवशोभषिति सूत्रे धातोरवयवस्यैकाच इति वैयधिकरण्येनान्वयेन गर्धप्सिद्धिः प्रयो।
जनसत्वं भाष्येन न प्रसिद्धमजर्घा इति अजर्घावे भिद्धीतीत्यादौ श्रममप्रपनाद्यस्तु चर्करीतं चेत्यस्यादादौ पाठेन
यङ्॰लुङन्ते गणान्तवप्रयुक्तविकरणस्याप्राप्त्या न भवन्ति छान्दसत्वादेव कार्यान्तराणामपि छन्दसि दृष्टप्रयोगो
द्दृष्टानामभावो बोध्यः भाषायान्तु तादृशानामभाव एव चर्त्तिषु शबादिनिर्देशास्तु भवतेरित्यादिस्थ तन्निर्देशव
न्नार्थसाधकास्त्वन्यत्र विस्तरः ११ ननु जंभा चिरयेश्नेसलिटी एवं सम्मतां किं द्विरपि ग्रहणेनेत्यत आह ॥ पद ७५
गौरवाद्योगविभागो गरीयान् ॥ प्रतिवाक्यं भिन्नवाक्यार्थबोधकत्वेन गौरवं स्पष्टमेव परं त भाष्यासम्मतेयं

टाङ्· मीति सूत्रस्य भाष्यविरुद्धाच तत्र चेनादेशे इकारप्रश्लेषाख्याने योगविभागेनैव कृतमिति विद्द्वः ॥१॥
अर्द्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः ॥ एओङ्· ऐऔच्सूत्रयोर्भाष्ये ध्वनितैषा तत्रानेकपदघटि
तसूत्रे प्रायेण पदलाघवविचार एव न तु मात्रालाघवविचार इति ऊकालोज्झ्रस्वदीर्घप्लुत इत्यादिसूत्रेषु भाष्ये ध्व
नितम् तत्र हि सूत्रे अलहलग्रहणयोर्विशेषविचारे समन्नायां हल्ग्रहल ग्रहणं एव त्रियेति सूत्रे णिजो रिति
वाच्यमिति तत्र शीणिपदाति अलग्रहणे तदेकं स्वादिलोपे हलग्रहणं एव त्रियेति सूत्रे णिजो रिति न वाच्यमिति
महत्कस्येति वाच्यमिति शीणिपदपदानीति नाखिलाघवकृतो विशेषस्युक्तम् अचिश्वितिसूत्रे णरसे वाशिष्ठेधा
रिति समस्थाणग्रहणात् परेणणग्रहणं तत्र विभक्तिनिर्देशे समस्थाणग्रहणे सार्द्धा स्ति सा मात्रा इणि इति सो
मात्रा इति लण् सूत्रभाष्योक्तेः स्पष्टा च अतः अपनीति सूत्रे पितीति वक्तव्यम् तत्रापमपा॰ र्थं स्त्रिबुक्तमिति सूत्रे
शितीति न कर्त्तव्यं भवतीति भाष्येन केवलं मात्रालाघवं यावदयमपर्थ इति कैयटोक्तेः प्रायेणेति शिवम् ॥ ॥
इति श्रीमदुपाध्यायोपनामक शिवभट्टसुत सतीगर्भज नागोजीभट्टविरचितः परिभाषेन्दुशेखरः समाप्तः ॥
सं· १८८९ ॥

५६